वै. ४१

संस्कृत

# सुदर्शन कवच

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्री गणेशाय नमः ॥ इति सुदर्शन कवच प्रारंभः ॥ अस्य श्री सुदर्शन कवच स्तोत्र मंत्रस्य ॥ अंतर्या
मि श्री नारायण ऋषिः ॥ श्री सुदर्शनो महा विष्णु देवता ॥ अनुष्टुप् छंदः ॥ सहस्रार इति बीजं ॥
सुं सुदर्शन इति शक्तिः ॥ चक्रराज इति कीलकं ॥ सुदर्शन प्रीत्यर्थे जपे विनियोगः ॥ आच
क्राय स्वाहा ॥ अंगुष्ठाभ्यां नमः ॥ विचक्राय स्वाहा तर्जनीभ्यां नमः ॥ सुचक्राय स्वाहा मध्यमाभ्यां न
मः ॥ ह्रि चक्राय स्वाहा अनामिक ॥ सं चक्राय स्वाहा कनिष्ठिका० ॥ आचक्राय स्वाहा हृदयाय नमः
विचक्राय० शिरसे० सुचक्राय० शिखाय० ॥ ह्रि चक्राय० कवचाय हुं ॥ सं चक्राय० अस्त्रा
य फट् ॥ इति दिग्बंधः ॥ सर्वाभीष्ट सिध्यर्थे जपे विनियोगः ॥ अथ ध्यानं ॥ शंखं चक्रं च
सुखेटं हलपरशुगदा कुंतपाशांदधानं अन्येवामेष्व चक्रे वसिमुसल लसद्वज्र शूलांकुशाग्नि ॥
ज्वालाकेशं किरीटं ज्वलदनलनिभं वह्नि सुप्रदिव्य कंठपत्यालीढं त्रिनेत्रं रिपुगणमथनं भा
वये च्चक्रराजं ॥ १ ॥ ॥ मस्तकं मे सहस्रारः फलं पातु सुदर्शनः ॥ भ्रुवौ मे चक्रराट् पातु ने
त्र द्वंद्व हलोचनः ॥ कर्णौ वेदे स्कृतः पातु घ्राणं पातु विभिषणः ॥ महादीसः कपोलो मे वो
ष्ठौ [illegible]दः ॥ २ ॥ दंतान्पातु जगद्वंद्यो रसनं मम सर्वदा ॥ सर्व विद्यास्कृ सर्वः पातु गिरं वाणे
श्वरो मम ॥ ३ ॥ वीरसिंहो मुखं पातु चुबुकं भक्तवत्सलः ॥ सर्वदा पातु मे कंठं मेघगंभीर नि
स्वनः ॥ ४ ॥ मम स्कंधे शुगं पातु धराभारापहारकः ॥ बाणासुर भुजारण्य दावाग्निः पातु

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

१

(२)

मे भुजौ ॥ कालनेमिशिरश्छेत्ता पातु मे कूर्परद्वयं ॥ करौ दिव्यायुधः पातु नखान्नखनखोपमः
कुक्षौ पातु महाहरः स्तनौ शत्रुनिबर्हणः ॥ पातु मे हृदयं भक्तजनानंदकरी सदा ॥ सर्वशास्त्रा
र्थसंभूतहेतु पातूदरं मम ॥ वक्षः पातु महाघोरदैत्यदानवमर्दनः ॥ ८ ॥ पातु मे हृदयं चैव भ
क्तानामभयप्रदः ॥ पार्श्वौ मे तु पातु दीनार्तशरणागतवत्सलः ॥ सर्वतः पृष्ठदेशं मे देवानामभ
यप्रदः ॥ नाभिं षट्कोणधामा मे पातु घंटारवः कटिं ॥ ११ ॥ आद्यमूलः पुमान्पातु गुह्यदेशं निरंतरं ॥
ऊरू पातु महाशूरो जानुनी भीमविक्रमः ॥ १२ जंघे पातु महावेगो गुल्फौ दीनार्तिभंजनः ॥
पादौ पातु सदा सर्वैर्ब्रह्माद्यैरभिवंदितः ॥ पातु पादतलं ह्येव विश्वभारो निरंतरं ॥ सुदर्शनो नृ
सिंहो मे शरीरं पातु सर्वदा ॥ १३ ॥ पातु सर्वांगकांतिं मे कल्पांताग्निसमप्रभः ॥ मम सर्वांगरो
माणि ज्वालाकेशाः सुरक्षतु ॥ १४ ॥ अंतर्बहिश्च मे पातु विश्वात्मा विश्वतोमुखः ॥ रक्षाही
नं च यत्स्थानं शचंडस्तत्र रक्षतु ॥ १५ ॥ सर्वतो दिक्षु मे पातु सहस्रज्वालसंयुत इति ॥ सुदर्श ल
नस्य कवचं सर्वकामफलप्रदं ॥ सर्वबाधोपशमनं सर्वव्याधिविनाशनं ॥ १६ ॥ सर्वशत्रु
क्षयकरं सर्वमंगलकारकं ॥ तस्य कार्येषु सर्वेषु विघ्नः क्वापि न जायते ॥ १७ ॥ सर्वपापक्ष
यकरं भोगमोक्षैकसाधनं ॥ प्रातरुत्थाय यो भक्त्या पठते यः सदा नरः ॥ त्रिसंध्यं वा जप

(2A) नांन्हणां सर्वदा विजयप्रदं ॥ यक्षराक्षसवेताळभैरवाश्च विनायकाः ॥ शाकिनी डाकि
नी मालामघकास्फोटकादयः ॥ भूतप्रेतपिशाचाश्च ये न्ये दुष्टग्रहानपि ॥ २० ॥ क
वचस्य वजशारं दृष्टिमात्रेण नैरिखळः ॥ पलायंते यथा नागा पक्षिराजस्य दर्शनात् ॥
२१ ॥ अस्यायुतं पुनश्चर्यौ दिशांशं तिल सर्पिषा ॥ हवनं लक्ष मंत्रेवं तर्पणं गंधवारि
णा ॥ २२ ॥ पुष्पांजलिः स्तद्दशांशैः मष्टांनैः सघृताप्लुतैः ॥ चतुर्विंशाद्विजान्भो
ज्या ततः कार्याणि साधयेत् ॥ २३ ॥ विन्यस्यांगे धरेद्धीरः युद्धार्थी यो धिगच्छति ॥ रणे
जित्वाखिलान्शत्रून्जयी भवति सध्रुवं ॥ २४ ॥ मंत्रितां बुत्रिवारं वा पिबेत्सप्त
दिनावधी ॥ श्चविनश्यंति सकलाः व्याधयः कुक्षिसंभवाः ॥ मुखप्रक्षालने
नेत्रे नासिकारोगनाशनं ॥ २५ ॥ भीतानामभिषेकं तु महाभयनिवार
ण ॥ सप्तभिर्मंत्रितानेन तुलसीमूलमृत्तिका ॥ लेपान्नश्यंति तद्रोगान्द
सद्यः कुमादयो स्विका ॥ २७ ॥ ललारे तिलकं नृणां मोहकृत्सर्ववश्य
न

(3)

कृत्या॥ परेषां मंत्रतंत्रादीतंत्राणोप्रविनाशकृत्॥ अग्निसर्पादिसर्वेषां विषापहरणं परं॥
सौवर्णे रजते वापि पात्रे भूर्जे त्वचेपि च॥ लिखित्वा योर्चयेद्भक्त्या श्रीमान्भवति स ध्रु
वं॥ बहुना किमिहोक्तेन यद्यदिच्छति मानवः॥ सकलं प्राप्नुयादस्य कवचस्य प्रभाव
तः॥ इति विहगेंद्रसंहितायां सुदर्शनकवचसंपूर्णं॥ श्रीकृष्णार्पणमस्तु॥ शुभं भ
वतु॥ अबाजी भट जमखिंडिकर याची पोथी॥ रामकृष्णायनमः॥ ॥ छ॥ ॥

२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com